A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# प्रकाशकीयम्

बिपिनकुमारझा
प्रकाशकः

सारस्वत-निकेतनान्तर्गत जाह्नवीत्याख्यायाः शोधपत्रिकायाः सप्तदशाङ्कस्य मकरार्कसङ्क्रात्यावसरे प्रकाशनं कुर्वन् हृष्यति मे मनः।

यथा शैत्यकारणात् मित्रः प्रभावशून्यरिव प्रतिभाति किन्तु आगते मकरे सति तस्य प्रभाव स्पष्टरूपे परिलक्ष्यते, तथैव इयं पत्रिका सदस्यानांकारणात् स्वकीयामाभायुता सम्भूय पुनः चारुतां वितनोति।

अस्मिन् अङ्के पत्रिकायामस्यां किञ्चित् परिवर्तनमस्माभिः कल्पितम्। अत्र लिपिसन्दर्भितात्रुटिनिवारणार्थं पुनर्टङ्कणस्य व्यवस्था कृता। तत्र संशोधनार्थं सम्पादनार्थं समीक्षणार्थञ्च नूतनसदस्यानामपि अङ्गीकरणं जातम्। पत्रिकायाः (institute कृते एव) Subscriplion कथं स्यादेतस्मिन् सन्दर्भेऽपि अस्माभिः चिन्तितम्।

मन्ये, किमपि कार्यं एकेन जनेन कर्त्तुं न शक्यते, सम्मिल्य एव एतादृशानि कार्याणि सम्पूर्णतां यान्ति। एतदवसरे, येषां केषामपि प्रत्यक्षपरोक्षं वा साहाय्यमस्माभिः लब्धं तत्कथं नाङ्गीकर्त्तुं शक्यम्। अतः सर्वेभ्योऽपि मनोवाक्कायपुरस्सरं हार्दं कार्तज्ञं वितनोमि।

**सौख्यमारोग्यकल्याणं, शान्तिः प्रीतिः दया यशः।**
**वर्धतां भारते देशे, नववर्षाभिनन्दनम्।।**

**श्रैमत्कः**
**बिपिनकुमार झा**

**बालहरः**
**मकरसङ्क्रान्तिः, संवत्-2070**